# ॥ वाल्मीकि रामायण॥

## ३ अरण्यकाण्ड

## अध्याय ७१

दिवं तु तस्यां यातायां शबर्यां स्वेन कर्मणा ।
लक्ष्मणेन सह भ्रात्रा चिन्तयामास राघवः ॥ १॥

चिन्तयित्वा तु धर्मात्मा प्रभावं तं महात्मनाम् ।
हितकारिणमेकाग्रं लक्ष्मणं राघवोऽब्रवीत् ॥ २॥

दृष्टोऽयमाश्रमः सौम्य बह्वाश्चर्यः कृतात्मनाम् ।
विश्वस्तमृगशार्दूलो नानाविहगसेवितः ॥ ३॥

सप्तानां च समुद्राणामेषु तीर्थेषु लक्ष्मण ।
उपस्पृष्टं च विधिवत्पितरश्चापि तर्पिताः ॥ ४॥

प्रनष्टमशुभं यत्तत्कल्याणं समुपस्थितम् ।
तेन त्वेतत्प्रहृष्टं मे मनो लक्ष्मण सम्प्रति ॥ ५॥

हृदये हि नरव्याघ्र शुभमाविर्भविष्यति ।
तदागच्छ गमिष्यावः पम्पां तां प्रियदर्शनाम् ॥ ६॥

ऋश्यमूको गिरिर्यत्र नातिदूरे प्रकाशते ।
यस्मिन्वसति धर्मात्मा सुग्रीवोऽंशुमतः सुतः ।
नित्यं वालिभयात्त्रस्तश्चतुर्भिः सह वानरैः ॥ ७॥

अभित्वरे च तं द्रष्टुं सुग्रीवं वानरर्षभम् ।
तदधीनं हि मे सौम्य सीतायाः परिमार्गणम् ॥ ८॥

इति ब्रुवाणं तं रामं सौमित्रिरिदमब्रवीत् ।
गच्छावस्त्वरितं तत्र ममापि त्वरते मनः ॥ ९॥

आश्रमात्तु ततस्तस्मान्निष्क्रम्य स विशां पतिः ।
आजगाम ततः पम्पां लक्ष्मणेन सहाभिभूः ॥ १०॥

समीक्षमाणः पुष्पाढ्यं सर्वतो विपुलद्रुमम् ।
कोयष्टिभिश्चार्जुनकैः शतपत्रैश्च कीचकैः ।
एतैश्चान्यैश्च विविधैर्नादितं तद्वनं महत् ॥ ११॥

स रामो विधिवान्वृक्षान्सरांसि विविधानि च ।
पश्यन्कामाभिसन्तप्तो जगाम परमं ह्रदम् ॥ १२॥

स तामासाद्य वै रामो दूरादुदकवाहिनीम् ।
मतङ्गसरसं नाम ह्रदं समवगाहत ॥ १३॥

स तु शोकसमाविष्टो रामो दशरथात्मजः ।
विवेश नलिनीं पम्पां पङ्कजैश्च समावृताम् ॥ १४॥

तिलकाशोकपुंनागबकुलोद्दाल काशिनीम् ।
रम्योपवनसम्बाधां पद्मसम्पीडितोदकाम् ॥ १५॥

स्फटिकोपमतोयाढ्यां श्लक्ष्णवालुकसन्तताम् ।
मत्स्यकच्छपसम्बाधां तीरस्थद्रुमशोभिताम् ॥ १६॥

सखीभिरिव युक्ताभिर्लताभिरनुवेष्टिताम् ।
किंनरोरगगन्धर्वयक्षराक्षससेविताम् ।
नानाद्रुमलताकीर्णां शीतवारिनिधिं शुभाम् ॥ १७॥

पद्मैः सौगन्धिकैस्ताम्रां शुक्लां कुमुदमण्डलैः ।
नीलां कुवलयोद्घातैर्बहुवर्णां कुथाम् इव ॥ १८॥

अरविन्दोत्पलवतीं पद्मसौगन्धिकायुताम् ।
पुष्पिताम्रवणोपेतां बर्हिणोद्घुष्टनादिताम् ॥ १९॥

स तां दृष्ट्वा ततः पम्पां रामः सौमित्रिणा सह ।
विललाप च तेजस्वी कामाद्दशरथात्मजः ॥ २०॥

तिलकैर्बीजपूरैश्च वटैः शुक्लद्रुमैस्तथा ।
पुष्पितैः करवीरैश्च पुंनागैश्च सुपुष्पितैः ॥ २१॥

मालतीकुन्दगुल्मैश्च भण्डीरैर्निचुलैस्तथा ।
अशोकैः सप्तपर्णैश्च केतकैरतिमुक्तकैः ।
अन्यैश्च विविधैर्वृक्षैः प्रमदेवोपशोभिताम् ॥ २२॥

अस्यास्तीरे तु पूर्वोक्तः पर्वतो धातुमण्डितः ।
ऋश्यमूक इति ख्यातश्चित्रपुष्पितकाननः ॥ २३॥

हरिरृक्षरजो नाम्नः पुत्रस्तस्य महात्मनः ।
अध्यास्ते तं महावीर्यः सुग्रीव इति विश्रुतः ॥ २४॥

सुग्रीवमभिगच्छ त्वं वानरेन्द्रं नरर्षभ ।

इत्युवाच पुनर्वाक्यं लक्ष्मणं सत्यविक्रमम् ॥ २५ ॥

ततो महद्वर्त्म च दूरसङ्क्रमं
क्रमेण गत्वा प्रविलोकयन्वनम् ।
ददर्श पम्पां शुभदर्श काननाम्
अनेकनानाविधपक्षिसङ्कुलाम् ॥ २६ ॥

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

---

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com